# Shri Matri Stuti

# श्रीमातृस्तुतिः

## Document Information

Text title : Shri Matri Stuti

File name : mAtRRistutiH.itx

Category : deities_misc, gurudev, rAmakRiShNa, stuti

Location : doc_deities_misc

Author : Swami Jivananda

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# श्रीमातृस्तुतिः

दिव्या माता सुशुद्धा हृदयसमुदये यार्चिता वन्दनीया
मायाहीना मदघ्नी परसुखनिलया पावनी विश्वपूज्या ।
नित्या श्रीशारदा सा वितरतु विमलं सत्सुखं मुक्तहस्ता
बुद्धां विज्ञानदात्रीं जनहितनिरतां चिन्तयेत् तां हि नित्यम् ॥ १॥

माता सृष्टिलयस्थितौ सुनिपुणा काली सुशान्तिप्रदा
नित्यानन्दमयी हि या सुखकरी दुर्गा विपत्तारिणी ।
शुद्धज्ञानविधायिनी सुपथदा या शारदा मोक्षदा
ध्येया मङ्गलकारिणी सुतरणी देवी हि सा भारती ॥ २॥

तन्वा नमामि नितरां मनसा च वाचा
मातः स्मरामि तव देवि पदारविन्दम् ।
हे शारदे जननि विश्वजनस्य मातः
दूरीकुरु त्वमचिरं विपदं च दुःखम् ॥ ३॥

प्रेमामृतं तव पदं खलु चिन्तनीयं
भावास्पदं सुविमलं महिमान्वितं वै ।
ध्येयं सदा हृदि महाभयविघ्ननाशं
क्लिष्टा नरा जननि ! सुष्ठु भजन्तु सर्वे ॥ ४॥

विश्वेश्वरीं विदितविश्वमनोभिलाषां
सन्तप्तदुःखहरणक्षमभक्तिदात्रीम् ।
श्रुत्यन्तवेद्यपरमाप्रकृतिं मवेशीं
श्री शारदां नमतु ना जननीं सुशान्ताम् ॥ ५॥

वसतु वसतु नित्यं विश्वमातान्तरे मे
पिब पिब मम चित्तं स्नेहधारां जनन्याः ।
वितरतु विमलां मे शान्तिधारां सदाम्बा
विमलचरणपद्मे भातु पूता सुभक्तिः ॥ ६॥

सदा मातुर्मूर्तिं विमलहृदये ध्येय चरितं
सुधापूर्णां वाणीं स्मर विपदि मातुर्हि परमाम् ।
भवाब्धौ विक्षुब्धे त्यज च कठिनं भावमसुखं
गृहाण त्वं भावं सहजसरलं शान्तिसुखदम् ॥ ७॥

शक्तिदात्रीं हि सङ्घस्य श्रीवृद्धिकारिणीं तथा ।
मातरं शारदादेवीं भगवतीं नमाम्यहम् ॥ ८॥

इति स्वामिजीवानन्दविरचिता “श्रीश्रीमातृस्तुतिः” समाप्ता ।

Proofread by Aruna Narayanan

*Shri Matri Stuti*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*